१०९५ – पत्र – २ –

Shri Raghunatha Temple MSS. Library,
JAMMU

No. १०९५ - घ

Title प्रणवोपनिषद्, आरुणेयोपनिषद्

Author

Extent 2 Age

Subject उपनिषत् . सम्पूर्णः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १०१५-घ

क प्रश्नोपनिषत्

ख आरुणेयोपनिषत्

ग कालाग्निरुद्रोपनिषत्

नं० १०१५-घ

पत्रे २ (द्वे)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनाव
धीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ पुरस्ताद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ॥
रहस्यं ब्रह्मविद्याया धृताग्निं संप्रचक्षते ॥ ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ॥ शरीरं तस्य व
क्ष्यामि स्थानकालत्रयं तथा ॥ तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोग्नयः ॥ तिस्रो मात्रार्धमात्रा
त्र च प्रत्यक्षस्य शिवस्य तत् ॥ ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च ॥ अकारस्य शरीरं तु व्याख्या
तं ब्रह्मवादिभिः ॥ यजुर्वेदोंतरिक्षं च दक्षिणाग्निस्तथैव च ॥ विष्णुश्च भगवान्देव उकारः परिकीर्ति
तः ॥ सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ॥ ईश्वरः परमो देवो मकारः परिकीर्तितः ॥ सूर्यमं
डलमाभाति ह्यकारश्चंद्रमध्यगः ॥ उकारश्चंद्रसंकाशस्तस्य मध्ये व्यवस्थितः ॥ मकारश्चाग्नि
संकाशो विधूमो विद्युतोपमः ॥ तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्नितेजसः ॥ शिखा च दीपसं
काशा यस्मिन्नुपरि वर्तते ॥ अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता ॥ पद्मसूत्रनिभा सूक्ष्मा
शिखाभा दृश्यते परा ॥ नासादित्यसंकाशा सूर्यं हित्वा तथा परं ॥ द्विसप्ततिसहस्राणि नाडि
भिस्त्वा तु मूर्धनि ॥ वरदं सर्वभूतानां सर्वं व्याप्यैव तिष्ठति ॥ कांस्यघंटानिनादस्य यदा लिप्यति शां
तयेष ॐकारस्तु तथा योज्यः श्रुतये सर्वमिच्छति ॥ यस्मिन्संलीयते शब्दस्तत्परं ब्रह्म गीयते ॥ सोमत
त्वाकल्पते ॥ सोमतत्त्वाय कल्पत इति ॥ हरिः ॐ तत्सत् ॥ सह नाववत्वित्यादि शांतिः ॥ इति श्रीप्रणवोपनि षत्समाप्तः ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१

श्रीगणेशाय नमः ॥ आरुणिः प्रजापतिर्लोकं जगाम तं गत्वोवाच केन भगवन् कर्माण्यशेषतो विसृजामीति ॥
स होवाच प्रजापतिस्तव पुत्रान् भ्रातॄन् बन्धादीन् शिखां च यज्ञोपवीतं यागं च स्वाध्यायं च भूर्लोकं च
भुवर्लोकं च महर्लोकं जनलोकं तपोलोकं सत्यलोकं चातलं पातालं वितलं सुतलं रसातलं महातलं तला-
तलं ब्रह्माण्डं च विसर्जयेद्दंडमाच्छादनं च कौपीनं च परिग्रहेत् शेषं विसृजेदिति ॥ इति प्रथमः
खंडः ॥ गृहस्थो ब्रह्मचारी वानप्रस्थो वा उपवीतं शिखां भूमौ वाप्सु वा विसृजेल्लौकाग्नीनुदराग्नौ
समारोपयेद्गायत्रीं च स्ववाचाग्नौ समारोपयेत् कुटीचरो ब्रह्मचारी कुटुंबं विसृजेत् पात्रं विसृजेत् पवित्रं
विसृजेद्दंडांल्लोकांश्च विसृजेदिति होवाचात ऊर्ध्वममंत्रवदाचरेत् त्रिसंध्यादौ स्नानमाचरेत् संधिं समा-
धावात्मन्याचरेत् सर्वेषु वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तयेदिति ॥ इति
द्वितीयः खंडः ॥ खल्वहं ब्रह्मसूत्रं सूचनात् सूत्रमहमेव सूत्रं ब्रह्मसूत्रमहमेव विद्वान्हि: सूत्रं त्यजे-
द्विद्वान् एवं वेद कामक्रोधहर्षरोषलोभमोहदंभदर्पासत्याहीन्पतरं छत्रमन्त्रमुपवीतं कर्म कलत्रं
त्यजेद्यथोपवीतलोकोपायमोविद्वान् सोपनजना इदं मेतानि प्राविसृजामीति रं छत्रमन्त्रमुपवीतं कर्मक-
लत्रं चान्यदपीह संन्यस्तं मया संन्यस्तं मयेति त्रिः कृत्वो वैणवं दंडं कौपीनं च परिग्रहेदन्यद्यथाभिक्षाचर्यं

ष

श्रीव:

१

चरति ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन हे रक्षतो हे रक्षतो ॥ इति तृतीयखंडः ॥ अथासः परमहंसा
नां परिव्राजकानामासनशयनादिकं भूमौ ब्रह्मचर्यं मृण्मयपात्रं अलाबुपात्रं दारुपात्रं वा यतीनां यत
यो हि भिक्षार्थं ग्रामं प्रविशंति सुदरपात्रं पाणिपात्रं पाणिपात्रं ॐ हि ॐ हि ॐ हि एतदुपनिषदं वि
न्यसेत् खल्वेतदुपनिषदं विद्वान् य एवं वेद पालाशं पैप्पलं वा दंडमजिनं मेखलां यज्ञोपवीतं च त्यक्त्वा
शूरो य एवं वेद ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ तद्विप्रासो विपन्यवो
जागृवांसः समिंधते ॥ विष्णोर्यत्परमं पदमिति निर्वाणमनुशासनमिति वेदानुशासनमिति
॥१॥ इत्यथर्ववेदे ब्राह्मणोपंचविंशति ॥२५॥ सल्लिगमः ॥ अथ कालाग्निरुद्र[illegible] भगवा
न् सनत्कुमारः पप्रच्छ अधीहि भगवन् त्रिपुंड्रविधिं सतत्त्वं किं द्रव्यं कति प्रमाणं का रेखाः किं
दैवतं के मंत्राः काः शक्तयः किं फलमिति तं होवाच भगवान् कालाग्निरुद्रः यद्द्रव्यं तदाग्नेयं
ह्म भस्म सद्योजातादि पंचब्रह्ममंत्रैः परिगृह्य अग्निरिति भस्मेत्यभिमंत्र्य मानस्तोके इति समु
द्धृत्य त्र्यंबकं यजामहे इति शिरो ललाट वक्षस्कंधेष्विति त्रिभिस्तिस्रो रेखाः प्रकुर्वीत व्रतमे
तच्छांभवं ततः समाचरन् मुमुक्षुर्न पुनर्भवाय अथ सनत्कुमारः प्रमाणमस्य त्रिधा ललाटादा चक्षुष
[illegible]श्च भ्रुवोर्मध्ये तो यास्य प्रथमा रेखा सा गार्हपत्यश्चाकारो भूर्लोकश्चात्मा क्रियास्य [illegible] द्वितीया रेखा
सा च दक्षिणाग्निरुकारः सत्त्वमंतरिक्षमंतरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यंदिनं सवनं
ऋग्वेदः प्रातःसवनं महेश्वरो यास्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ सदाशिवोपास्यस्तृतीयारेखासाआहवनीयोमकारस्तमोद्यौः॥परमात्माज्ञानशक्तिः॥सामवेदस्तृ
2 तीयसवनंशिवोदेवतेतियोविद्वान्ब्रह्मचारीगृहस्थोवानप्रस्थोयतिर्वासमस्तपातकउपपातके
भ्यःपूतोभवतितेनसर्वेवेदाध्यातोभवंतिससर्वैर्देवैर्ज्ञातोभवतिससर्वेषुतीर्थेषुस्नातोभवति
देहंत्यक्त्वाशिवसायुज्यतामेतिनचपुनरावर्ततेनचपुनरावर्तते॥इत्याहभगवान्कालाग्निरु
द्रः॥इत्यथर्वणवेदेकालाग्निरुद्रोपनिषत्समाप्तः॥इतिकालाग्निरुद्रोपनिषत्समाप्तः॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative